# अभ्यासप्रश्नपत्रम् – 2025-26

## कक्षा – एकादशी

## संस्कृतम् (केन्द्रिकम्) (कोडसं.-322)

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**अस्य प्रश्नपत्रस्य भागपञ्चकं अस्ति -**

**'क' भागः अपठित - अवबोधनम् - 10 अङ्काः**

**'ख' भाग: रचनात्मक कार्यम् - 15 अङ्काः**

**'ग' भागः अनुप्रयुक्त - व्याकरणम् - 20 अङ्काः**

**'घ' भागः - 35 अङ्काः**

**(i) पठितावबोधनम्(25 अङ्काः)**

**(ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः (10 अङ्काः)**

**सामान्यनिर्देशाः -**

- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन पठनीयाः।

# 'क' भागः - अपठित-अवबोधनम्

| | | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानामुत्तराणि संस्कृतेन लिखत –**<br>जीवने सफलताया: आधार: पुरुषार्थ: एव। अस्य अभावेन नर: सुखसमृद्धिम् आप्तुम् असमर्थ: भवति यश: च न प्राप्नोति। यदा यदा नर: पुरुषार्थम् अचिनोत् तदा तदा तेन सफलता प्राप्ता।पुरुषार्थिन: एव संसारे विलक्षणप्रतिभाम् अर्जितवन्त:। देशसेवया, समाजसेवया शिक्षाप्रसारेण च पुरुषार्थिभि: उल्लेखनीयानि कार्याणि कृतानि। अस्माकम् इतिहासे तेषां गौरवगानं विद्यते।आपत्काले येषां मनांसि विचलितानि न भवन्ति, ते एव जीवने सफलतां प्राप्नुवन्ति। पुरुषार्थिनां कृते तु पुरुषार्थ: एव उपासना अस्ति।य: जन: स्वजीवने सफलतां प्राप्तुम् इच्छति, स: पुरुषार्थम् अवश्यमेव कुर्यात्।पुरुषार्थस्य अभावे जन: सफलतां प्राप्तुं न शक्नोति। | 10 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) जीवने सफलताया: आधार: क:?<br>(ii) केषां कृते पुरुषार्थ: उपासना अस्ति।?<br>(iii) के संसारे विलक्षणप्रतिभाम् अर्जितवन्त:? | 1×2=2 |
| | **(आ) पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्)**<br>(i) येषां मनांसि आपत्काले विचलितानि न भवन्ति, ते किं कुर्वन्ति ?<br>(ii) जन: कस्य अभावे सफलतां प्राप्तुं न शक्नोति?<br>(iii) क: जन: पुरुषार्थम् अवश्यमेव कुर्यात् ? | 2×2=4 |
| | **(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** | 1×1=1 |
| | **(ई) यथानिर्देशम् उत्तरत-**<br>(i) **"अस्माकम् इतिहासे तेषां गौरवगानं विद्यते"** अत्र क्रियापदं किम्?<br>(क) अस्माकं (ख) तेषां<br>(ग) विद्यते (घ) गौरवगानं<br>(ii)**"अपयश:"**इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?<br>(क) असमर्थ: (ख) सफलता<br>(ग) गौरवगानं (घ) यश: | 1×3=3 |

| | | |
|---|---|---|
| | (iii) **“उल्लेखनीयानि”**इत्यस्य पदस्य किं विशेष्यमत्र प्रयुक्तम्?<br>(क) कार्याणि (ख)कृतानि<br>(ग) विचलितानि (घ) प्राप्नुवन्ति | |
| | **‘ख’ भागः - रचनात्मक-कार्यम्** | |
| **2.** | भवान् दिनेश: मुम्बईनगरे निवसति। परीक्षायां सफलतायै वर्धापनं दातुं स्वमित्रम् अर्जुनं प्रति लिखिते अस्मिन् पत्रे उचितपदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पत्रं पुन: लिखत।<br><br>(i)..............<br>दिनाङ्क:<br><br>प्रियमित्रं (ii)---------<br>सप्रेम नमस्ते।<br><br>अत्र कुशलं तत्रास्तु ।अद्यैव दशमकक्षाया:(iii)---------केन्द्रीय-माध्यमिक-शिक्षाबोर्डद्वारा समुद्घोषित:। मया ‘इण्टरनेट’ इति माध्यमेन तव परीक्षापरिणाम: (iv)---------- ।अस्यां परीक्षायां त्वं पञ्चनवति: प्रतिशतम्(v)---------- प्राप्य समुत्तीर्ण:।(vi)--------- तु शतमेव अङ्कान् लब्धवान् असि। योग्यतासूच्याम् अपि तव नाम दृष्ट्वा अहं हार्दिकं मोदम् अनुभवामि। (vii)----------- कठोर: परिश्रम: सफलो जात:। त्वया न केवलं (viii)-------- अपितु स्वकुटुम्बस्य अपि यश: वर्धितम् । अहम् एतस्यै उच्चसफलतायै तुभ्यं हार्दिकं(ix)---------यच्छामि।<br><br>मातृ-पितृचरणयो: प्रणाम:।<br><br>तव अभिन्नमित्रम् | ½×10=5 |

**(x)----------**

**मञ्जूषा**

| |
|---|
| संस्कृते, मुम्बईतः, अङ्कान्, विदितः, आत्मनः, तव, अजयः, दिनेश!, परीक्षापरिणामः, वर्धापनं। |

**3.** **अधः प्रदत्तं चित्रम् आधृत्य पञ्चविंशति-त्रिंशत् शब्दैः अनुच्छेदमेकं लिखत।सहायतार्थं मञ्जूषायां पदानि प्रदत्तानि सन्ति।-** **5**




| |
|---|
| मञ्जूषा-<br>महिलाः, भित्तिः,रचयन्ति, उपरि, चित्राणि , तूलिका,अर्थोपार्जनम्,लोककला, सुन्दराणि,वर्णाः |

**अथवा**

**अधः प्रदत्तं विषयम् आधृत्य पञ्चविंशतितः त्रिंशत्परिमितैः शब्दैः अनुच्छेदमेकं लिखत। सहायतार्थं मञ्जूषायां पदानि प्रदत्तानि सन्ति।**

<table>
<tr><td></td><td>

**विषय: -अनुशासनस्य महत्त्वम्**

**मञ्जूषा-**

| |
|---|
| आवश्यकम्,प्राप्यते, चरित्रनिर्माणम्,समयपालनम्, शिक्षयति,जीवने,सर्वस्मिन् क्षेत्रे, सफलता, नियमानां पालनम्, बाल्यावस्थायाम् |

</td><td></td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td>4.</td><td>

**मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -**

एकस्य कृषकस्य(i)----------पुत्रा: आसन्। ते चत्वारोऽपि भ्रातर: परस्परं (ii)-----------कुर्वन्ति स्म। तेषां चतुर्णां भ्रातृणां कलहं दृष्ट्वा स:(iii)----------दु:खी आसीत्। एकदा स: शुष्ककाष्ठानि एकत्रीकृत्य तानि(iv) -----------बद्ध्वा पुत्राणां समक्षम् अस्थापयत्। तान् पुत्रान् अवदत् च एतानि काष्ठानि त्रोटयन्तु। पुत्रेषु एक: अपि तानि(v) -----------समर्थ: न अभवत्। तदा स: पृथक्कृत्य पुत्राणां समक्षं पुन:(vi)----------। सर्वे पुत्रा: (vii)----------सर्वाणि काष्ठानि अत्रोटयन्। स:(viii)-----------अकथयत् – यदि एवमेव यूयमपि परस्परं मिलित्वा(ix) ---------- करिष्यन्ति,तर्हि कोऽपि युष्मान् हन्तुं समर्थ: न भविष्यति। यतोहि(x)----------शक्ति: कलौ युगे।

**मञ्जषा-**

| |
|---|
| जीवनयापनं,कृषक:,त्रोटयितुं, संघे, पुत्रान्, अस्थापयत्, चत्वार:, कलहं, रज्ज्वा, सरलतया |

**अथवा**

**अधोलिखित संवादे मञ्जूषायाः साहाय्येन रिक्तस्थानानि पूरयन्तु।**

**जयः** - मित्र! ह्यः कुत्र आसीत्?

</td><td>½×10=5<br><br>1×5=5</td></tr>
</table>

**रविः** (i) ------------------------------------------- |

**जयः** -प्रगतिमैदाने किमर्थं गतवान्?

**रविः** - (ii) -------------------------------------------|

**जयः** - विश्वपुस्तकमेलायाः आयोजने किं भवति ?

**रविः** -**(iii)** -------------------------------------------|

**जयः** - बहवः प्रकाशकाः किमर्थं पुस्तकानां प्रदर्शनीं कुर्वन्ति ?

**रविः** -**(iv)** -------------------------------------------|

**जयः** -शोभनम्, पुस्तकानां प्रदर्शन्यां जनाः पुस्तकानि द्रष्टुं क्रेतुं च आगच्छन्ति? पुस्तकमेलायाः आयोजनं कदा पर्यन्तं भविष्यति?

**रविः** - -**(v)** -------------------------------------------|

**जयः** - अहम् अपि नवम्बरमासस्य अष्टदशदिनांके पुस्तकमेलाया: अन्तिमे दिवसे गमिष्यामि |

**मञ्जूषा**

| |
|---|
| **तत्र बहवः प्रकाशका: पुस्तकानां प्रदर्शनीं कुर्वन्ति**<br>**ह्यः अहं प्रगतिमैदाने आसम् ।**<br>**प्रगतिमैदाने विश्वपुस्तकमेलाया: आयोजनम् अस्ति।**<br>**अहम् नवम्बरमासस्य अष्टादशदिनांके पुस्तकमेलायाः अन्तिमे दिवसे तत्र गमिष्यामि।**<br>**पुस्तकानां प्रदर्शन्यां जनाः पुस्तकानि द्रष्टुं क्रेतुं च आगच्छन्ति।** |

## 'ग' भागः –अनुप्रयुक्तं व्याकरणम्

| | | |
|---|---|---|
| 5. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं सन्धिच्छेदं वा कुरुत –**<br>I. **भृत्यास्ते** तात योजिताः।<br>II. **तत्र+एव** स्नानमपि संपादयन्ति।<br>III. **सत्+निमित्तं** त्यागः वरं भवति।<br>**अथवा**<br>I. स्वयं **च+आदाय** सलिलबिन्दूनपाययत्।<br>II. कच्चिदर्थं विनिश्चित्य क्षिप्रं कर्म आरभसे ।<br>III. अव्यक्ता हि गतिः+दुःखं देहवद्भिः अवाप्यते ।<br>IV. | 1×3=3 |
| 6. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत –**<br>(i) प्राञ्जलिं **पतितं** भुवि।<br>(क) पत्+इतं (ख)पति+तम्<br>(ग) पत्+क्त(घ) पत+तं<br>(ii) फलशकलानि **सम्+आ+हृ+ल्यप्**।<br>(क) समाहृत्य(ख)समाहृल्यप् | 1×3=3 |

| | | |
|---|---|---|
| | (ग) समाहृल्य (घ) समाहृत्यप्<br>(iii) तत् क्षणं कृष्णः **<u>वच्+क्तवतु</u>** ।<br>(क) उक्तवतु(ख) वचवतु<br>(ग) उक्तवान् (घ) वचवान् | |
| **7.** | **अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितशब्दं चित्वा रिक्तस्थानानि पूरयत।**<br>(i)राजानं --------- वा महतीं श्रियं प्रापयेत्।<br>(क) राजपुत्रं (ख) राजपुत्रेण<br>(ग) राजपुत्रात् (घ) राजपुत्रस्य<br>(ii) बाले---------- औरस इव पुत्रे स्निह्यति।<br>(क) अस्य (ख) अस्माकं<br>(ग)अस्मिन्(घ)अस्मात्<br>(iii) सुब्बणस्य ---------सहजाभिलाषः आसीत् ।<br>(क) सङ्गीतं(ख) सङ्गीते<br>(ग) सङ्गीतस्य(घ) सङ्गीताय | **1×3=3** |

| | | |
|---|---|---|
| **8.** | **अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितक्रियापदं चित्वा रिक्तस्थानानि पूरयत।**<br>(i)पद्मिनी नाम्नी एका पुष्करिणी -----------।<br>(क) आसीत्    (ख) आस्ताम्<br>(ग) सन्ति    (घ) स्त:<br><br>(ii) यदि त्वं चित्तं मयि स्थिरं कर्तुं न---------।<br>(क) शक्नोति    (ख)शक्नुवन्ति<br>(ग)शक्नोषि    (घ)शक्नोमि<br><br>(iii) प्रथमे वयसि वर्तमानं शबरसेनापतिम् अहम् -----------।<br>(क) अपश्यत्    (ख) अपश्यम्<br>(ग) अपश्यताम्  (घ) अपश्यन् | **1×3=3** |
| 9. | **समुचितं उपपदविभक्तिरूपं चिनुत-**<br><br>I. --------- परित: नाना वृक्षा: सन्ति।(**पुष्करिणी**)<br>II. तस्मिन् मृगयाकलकले ----------- निष्क्रम्य दिदृक्षु।(**पितुरुत्सङ्ग**)<br>III. पुराणिकशास्त्री राजभवनं---------- साकं अगमत्। (**पुत्र**) | 1x3=3 |
| 10. | **अधोलिखितवाक्येषु वाच्यानुसारं रिक्तस्थानानि पूरयत-**<br><br>(i) अनेन एव तावद् अहं -------- ।<br>(क) क्रीडिष्यामि(ख) क्रीडिष्याव: | **1 x 2 = 2** |

| | | |
|---|---|---|
| 11. | (ग) क्रीडिष्यति (घ) क्रीडिष्यसि<br><br>(ii)त्वया सिंहशिशुः न -------।<br>(क) त्यजति (ख) त्यज्यते<br>(ग) त्यजामि (घ) त्यज्यन्ते<br><br>**अथवा**<br>**वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयत -**<br>I. मन्त्री विजयमूलं -----------।(भू)<br>II. हारीतेन ------------ दृश्यते । (शुकशावकः)<br><br>**रेखांकितस्य अशुद्धपदस्य स्थाने प्रदत्तविकल्पेभ्यः शुद्धं पदं चित्वा लिखत**<br>(i)मन्त्रो विजयमूलं हि <u>**राजा**</u> भवति राघव।<br>(क) राज्ञा(ख) राज्ञां<br>(ग) राजानं(घ) राज्ञि<br><br>(ii) भो: शास्त्रिण:,<u>**कुमारं**</u> चतुरोऽस्ति।<br>(क) कुमाराय(ख) कुमारस्य<br>(ग) कुमारे(घ) कुमार:<br><br>(iii)<u>**स:**</u> प्राप्नुवन्ति मामेव सर्वभूतहिते रता:।<br>(क) तौ(ख) तयो:<br>(ग) ते(घ) तेषां | 1x3-3 |

| | | |
|---|---|---|
| 12. | **खण्डः – घ भाग - I**<br>**पठितांशावबोधनम् 25 अङ्काः**<br><br>**अधोलिखितं गद्याशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>आम्, महाप्रभो, इति शास्त्री प्रत्युवाच। पुन: स्मयपूर्वकं राजा बालं सम्बोध्य अये वत्स, किं भवानपि पितृवत् पुराणप्रवचनं करिष्यति! इति पर्यपृच्छत्। तदा स: बाल: - अहं पुराणप्रवचनं न करोमि। सङ्गीतं गायामीति व्याहरत्। तदा राजा आह, तथा ननु। तर्हि एकं गानं शृणुमस्तावत् इत्यवदत्। अनुपदमेव सुब्बण्ण: श्रीराघवं दशरथात्मजमित्यादि श्लोकं सङ्गीतमार्गेण अश्रावयत् तदन्ते स: कस्तूरी-तिलकमित्यादि श्लोकोऽपि मम कण्ठस्थोऽस्तीत्यगदत्।<br><br>**(अ) एकपदेन उत्तरत –(केवलं प्रश्नद्वयम्)**<br>(क) महाप्रभो इति क: प्रत्युवाच?<br>(ख) सुब्बण्ण: दशरथात्मजमित्यादि-श्लोकं केन माध्यमेन अश्रावयत्?<br>(ग) 'तर्हि एकं गानं शृणुम:' इति क: अवदत्?<br>**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क)राजा बालं किं पर्यपृच्छत्?<br>(ख) अनुपदमेव सुब्बण्ण: किम् अश्रावयत्?<br>(ग) पुन: स: किम् अगदत्?<br>**(इ) यथानिर्देशमुत्तरत-**<br>(क) 'नृप:' इति पदस्य पर्यायपदं किं प्रयुक्तम्?<br>(ख) 'आदौ' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?<br>**अथवा**<br>(क) 'अहं पुराणप्रवचनं न करोमि' इत्यत्र क्रियापदं किम् ?<br>(ख) 'तर्हि एकं गानं शृणुमस्तावत्' अत्र विशेषणपदं किम् ? | 5<br><br>½×2=1<br><br>1×2=2<br><br>1×2=2 |
| | | |

| | | |
|---|---|---|
| 13. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br><br>**अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।**<br>**अभ्यासयोगेन ततो मामिच्छासुं धनञ्जय।।**<br>**श्रेयो हि ज्ञानमभ्यासाद्ज्ञानाद्ध्यानं विशिष्यते।**<br>**ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्।।**<br><br>**एकपदेन उत्तरत--(केवल प्रश्नद्वयम्)**<br>(क) त्वं किं समाधातुं न शक्नोषि?<br>(ख) अभ्यासात् किं श्रेय:?<br>(ग) त्यागात् अनन्तरं किं भवति?<br>**पूर्णवाक्येन उत्तरत-(केवल प्रश्नद्वयम्)**<br>(क) ज्ञानाद् किं विशिष्यते?<br>(ख) धनञ्जयः केन ईश्वरम् आप्तुम् इच्छतु ?<br>(ग) कुत्र चित्तं समाधातुं न शक्नोषि?<br>**निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) 'श्रेष्ठ:' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?<br>(ख) 'अज्ञानं' पदस्य विलोमपदम् अत्रकिं प्रयुक्तम् ?<br>**अथवा**<br>(क) 'स्थिरं चित्तं' अनयो: विशेषणपदं किमस्ति?<br>(ख) 'पश्चात्' इत्यर्थे अत्र किं पदं प्रयुक्तम् ? | 5<br><br><br><br><br><br><br><br>½×2=1<br><br><br><br><br>1×2=2<br><br><br><br>1×2=2 |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत - –**<br>दौवारिक: - (प्रविश्य) जयतु जयतु देव:।<br>वै. गौराङ्ग: - दौवारिक! सत्वरं त्रिचतुरांस्तन्तुवायान् समानय।<br>दौवारिक: - यद्देव आज्ञापयति। (बहिर्गत्वा त्रीन् तन्तुवायान् समानीय प्रविशति)<br>वै. गौराङ्ग: -(तन्तुवायानुद्दिश्य) भो भो ! यूयं निर्मितान् पटान् मह्यम् दत्त। | 5 |

| | | |
|---|---|---|
| | तन्तुवायाः - न वयमयोग्यमूल्यत्वात् पटं निर्मामः।<br>वै. गौराङ्गः - अस्तु, शोभनं पटं निर्माय मह्यम् दत्त, योग्यं मूल्यं भविष्यति। गृहाण इमाः मुद्राः।(इति पञ्चदशमुद्रा ददाति, ते न गृह्णन्ति, हठात्तेषां वसने निबध्य गलहस्तेन निष्कासयति)<br>**(अ) एकपदेन उत्तरत -(केवलं प्रश्नद्वयम्)**<br>(क) कः जयतु?<br>(ख) वै. गौराङ्गः कति मुद्राः ददाति?<br>(ग) 'सत्वरं त्रिचतुरांस्तन्तुवायान् समानय' इति कं प्रति कथयति वै. गौराङ्गः?<br><br>**(आ) पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम्)**<br>(क)दौवारिकः बहिर्गत्वा किं करोति?<br>(ख) वै. गौराङ्गः तन्तुवायानुद्दिश्य किं कथयति?<br>(ग)तन्तुवायाः किं उत्तरन्ति?<br><br>**(इ) यथानिर्देशमुत्तरत-**<br>(क) 'त्रीन् तन्तुवायान्' अनयोः पदयोः विशेषणपदं किम् ?<br>(ख) 'अन्तः' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?<br>**अथवा**<br>(क) 'यूयं निर्मितान् पटान् मह्यम् दत्त'अत्र क्रियापदं किम् ?<br>(ख) 'उत्तमम्' इत्यर्थे अत्र किं पदं प्रयुक्तम् ? | ½×2=1<br><br><br><br><br><br>1×2= 2<br><br><br><br><br>1×2=2 |
| | | |
| 15. | **अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –**<br>**काचः काञ्चनसंसर्गाद् धत्ते मारकतीं द्युतिम्।**<br>**तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम्।।**<br><br>**भावार्थः**- यथा सुवर्णस्य संसर्गात् (i) ----------- अपि दीप्यमानं भवति तथैव (ii). ............सङ्गेन (iii) ..........अपि कुशलतां प्राप्नोति। | 1×3=3 |

| | | | |
|---|---|---|---|
| | **मञ्जूषा**<br><br>**मूर्खः,काचः, सज्जनानां**<br><br>**अथवा**<br><br>**प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-**<br><br>**(क) शुभाशुभपरित्यागी भक्तिमान् यः सः मे प्रियः।**<br>i. शुभाशुभकर्मफलत्यागकर्त्ता भक्तियुक्तः नरः ईश्वरस्य प्रियः।<br>ii. शुभाशुभकर्मणां त्यागं करोति नरः।<br>iii. भक्तियुक्तः नरः शुभम् अशुभञ्च कर्म न करोति।<br><br>**(ख) क्षिप्रम् आरभसे कर्म न दीर्घयसि राघव।**<br>i. भरत! कार्यं दीर्घं भवति।<br>ii. भरत! कार्यं शीघ्रं भवति।<br>iii. भरत! त्वं कार्यं शीघ्रं करोषि अथवा विलम्बेन।<br><br>**(ग) प्रदूषितं जलं पीत्वा जनाः अपि रुग्णाः भवन्ति।**<br>i. दूषितं जलं पीत्वा जनाः अस्वस्थाः भवन्ति।<br>ii. स्वच्छजलं पीत्वा जनाः अस्वस्थाः भवन्ति।<br>iii. स्वच्छजलं पीत्वा जनाः स्वस्थाः भवन्ति । | 1×3=3 |
| | | |

| | | |
|---|---|---|
| 16. | **अधोलिखित-अन्वये रिक्तस्थानानि पूरयत –**<br>**जटिलं चीरवसनं प्राञ्जलिं पतितं भुवि।**<br>**ददर्श रामो दुर्दर्शं युगान्ते भास्करं यथा।।**<br><br>**अन्वयः** - यथा (i)........भास्करं (तथा) रामः जटिलं चीरवसनं (ii)............पतितं दुर्दर्शं(भरतं)(iii)..........।<br><br>**ददर्श,युगान्ते, भुवि** | 1×3=3 |
| | | |
| 17. | **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -**<br>**'क' स्तम्भः** — **'ख' स्तम्भः**<br>क पश्य राजमुद्राङ्कितं — i महान् मत्स्यो दृष्टः<br>ख पुष्करिण्यां एको — ii प्रमाणपत्रम्<br>ग समः शत्रौ च मित्रे च — iii कोऽप्रियः प्रियवादिनाम्<br>घ को विदेशः सविद्यानां — iv तथा मानापमानयोः<br><br>**अथवा**<br>**अधोलिखितवाक्येषु रेखाङ्कितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं चित्वा लिखत –**<br>(i) <u>**अनिर्वचनीयम्**</u> एतत्पटयोः सौन्दर्यम्।<br>(ii) महाराजस्य सुन्दरं <u>**मुखम्**</u>।<br>(iii) तटवर्तिवृक्षाणां <u>**छेदनं**</u> कृतवन्तः।<br>(iv) यस्मिन्नेव <u>**कानने**</u> निवसन्ति।<br>(**मञ्जूषा**–वने , आननम्, अवर्णनीयम्,कर्तनं) | 1×4=4 |
| | **संस्कृतसाहित्येतिहासपरिचयः** | |

| | | |
|---|---|---|
| 18. | **संस्कृतभाषायाः उद्भवं पाठानां परिचयं च अधिकृत्य प्रदत्तान् प्रश्नान् उत्तरत - (केवलं प्रश्नत्रयम् )**<br>(i) संस्कृतभाषायाः लिपिः का अस्ति?<br>(ii) संस्कृतशब्दस्य व्युत्पत्तिः का?<br>(iii) ‘स मे प्रियः’ इति पाठः कस्मात् ग्रन्थात् संकलितः?<br>(iv) रामायणात् कः पाठः संकलितः? | **1×3=3** |
| 19. | **वैदिकं साहित्यम् अधिकृत्य प्रदत्तवाक्येषु मञ्जूषायाः साहाय्येन रिक्तस्थानपूर्तिं कुरुत -**<br>(i) गेयात्मकः वेदः ------- अस्ति ।<br>(ii) वेदाङ्गानि ------ सन्ति ।<br>(iii) यजुर्वेदः-------- वेदः अस्ति।<br>(iv) निरुक्तं ----------उच्यते।<br>**मञ्जूषा**<br>**श्रोत्रं, सामवेदः, षड्, यज्ञप्रधानः** | **1×4=4** |
| 20. | **रामायणं महाभारतं पुराणानि च अधिकृत्य 'क' भागं 'ख' भागेन सह मेलयत -**<br>**'क' भागः** — **'ख' भागः**<br>क पञ्चलक्षणयुक्तं — i महाभारतम्<br>ख पञ्चमो वेदः — ii रामायणम्<br>ग चतुर्विंशतिसाहस्री संहिता — iii पुराणम् | **1×3=3** |

------------------ ------------------